শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীহরিরাযাচার্য ৱিরচিতম্

# ॥ শ্রীকৃষ্ণভুজঙ্গপ্রযাতাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীকৃষ্ণভুজঙ্গপ্রযাতাষ্টকম্ ॥

সদা গোপিকামণ্ডলে রাজমানং
লসন্নৃত্যবন্ধাদিলীলানিদানম্।
গলদ্দর্পকন্দর্পশোভাভিদানং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **1** ॥

ৱ্রজস্ত্রীজনানন্দসন্দোহসক্তং
সুধাৱর্ষিৱংশীনিনাদানুরক্তম্।
ত্রিভঙ্গাকৃতি স্ৱীকৃতস্ৱীযভক্তং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **2** ॥

স্ফুরদ্রাসলীলাৱিলাসাতিরম্যং
পরিত্যক্তগেহাদিদাসৈকগম্যম্।
ৱিমানস্থিতাশেষদেৱাদিনম্যং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **3** ॥

স্ৱলীলারসানন্দদুগ্ধোদমগ্নং
প্রিযস্ৱামিনীবাহুকণ্ঠৈকলগ্নম্।
রসাত্মৈকরূপাঽৱবোধং ত্রিভঙ্গং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **4** ॥

রসামোদসম্পাদকং মন্দহাসং
কৃতাভীরনারীৱিহারৈকরাসম্।
প্রকাশীকৃতস্ৱীযনানাৱিলাসং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **5** ॥

জিতাঽনঙ্গসর্ৱাঙ্গশোভাভিরামং
ক্ষপাপূরিতস্বামিনীৱৃন্দকামম্।
নিজাধীনতাৱর্তিরামাতিৱামং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **6**॥

স্বসঙ্গীকৃতানন্তগোপালবালং
ৱৃতস্বীযগোপীমনোৱৃত্তিপালম্।
কৃতানন্তচৌর্যাদিলীলারসালং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **7**॥

ধৃতাদ্রীশগোৱর্ধনাধারহস্তং
পরিত্রাতগোগোপগোপীসমস্তম্।
সুরাধীশসর্ৱাদিদেৱপ্রশস্তং
ভজে নন্দসূনুং সদানন্দরূপম্॥ **8**॥

॥ ইতি শ্রীকৃষ্ণভুজঙ্গপ্রযাতাষ্টকং সমাপ্তম্॥